श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

दोड्डैयाचार्यस्वामि विरचितं

# ॥ श्रीयोगलक्ष्मीनरसिंहसुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीयोगलक्ष्मीनरसिंहसुप्रभातम् ॥

कौसल्यासुप्रजाराम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल ! कर्तव्यं दैवमाह्निकम्॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गळं कुरु॥

मातः सुधाफललते ! महनीयशीले !
वक्षोविहाररसिके ! नृहरेरजस्रम्।
क्षीराम्बुराशितनये ! श्रितकल्पवल्लि !
श्रीमन्नृसिंहदयिते ! तव सुप्रभातम्॥ १ ॥

तव सुप्रभातमनवद्यवैभवे
घटिकेशसद्गुणनिवासभूतले।
घटिताखिलार्थघटिकाद्रिशेखरे
घटिकाद्रिनाथदयिते ! दयानिधे॥ २ ॥

अत्र्यादिका मुनिगणा विरचय्य सन्ध्यां
दिव्यस्रवन्मधुझरीकसरोरुहाणि।
पादार्पणाय परिगृह्य पुरः प्रपन्नाः
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ ३ ॥

सप्तर्षिसङ्घकृतसंस्तुतिसुप्रसन्न !
श्रीमन्नृसिंह गुणरूप रमामहीभ्याम्।
साकं नृसिंहगिरिसत्त्वकृताधिवास !
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ ४ ॥

देवारिभञ्जनमरुत्सुतदत्तशङ्ख-
चक्रातपत्रितफणीश्वरपत्रिशेषिन्।

देवेन्द्रमुख्यसुरपूजितपादपद्म
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ ५ ॥

स्वामिन् ! सुरेश ! मधुरेश ! समाहितार्थ
ध्यानप्रवीण ! विनतावनजागरूक।
सर्वज्ञ ! सन्ततसमीरितसर्ववृत्त !
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ ६ ॥

प्रह्लादरक्षणनिदानकृतावतार !
मुग्धस्वकीयनखरैः स्फुटितारिवक्षः।
सर्वाभिवन्द्यनिजवैभव चन्द्रकान्त !
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ ७ ॥

भक्तोचितादिसरसः सुगुणं प्रकृष्टं
तीर्थं सुवर्णघटपूरितमादरेण।
धृत्वा श्रुतिप्रवचनैकपरा लसन्ति
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ ८ ॥

संश्लाघनीयपरमोत्तररङ्गवासि-
सूरिस्तुतिप्रथितविग्रहकान्तिकान्त।
सद्भिः समर्चितपदाम्बुज ! साधुरक्षिन्
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ ९ ॥

तीर्थानि गोमुखगतान्यखिलानि धृत्वा
भव्यानि भव्यनिकराः परितो लसन्ति।
गायन्ति गानचतुरास्तव दिव्यवृत्तं
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ १० ॥

वाराणसीप्रथितविष्णुपदीप्रयाग-
विख्यातविश्वनतसद्घटिकाचलेन्द्र।
सम्प्रार्थितार्थपरिदानकृतैकदीक्ष !
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ ११ ॥

पार्श्वद्वयस्थितरमामहिशोभमान !
श्रीचोलसिंहपुरभाग्यकृतावतार।
स्वामिन् सुशील सुलभाश्रितपारिजात !
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ १२ ॥

श्रीश्रीनिवासघनदेशिकवर्यभक्ति-
संवर्धितप्रतिदिनोत्सवशोभमान।
कल्याणचेलकनकोज्ज्वलभूषणाढ्य
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ १३ ॥

श्रीब्रह्मतीर्थतटमागतमञ्जनाभं
देवं प्रणम्य वरदं घटिकाद्रिमेत्य।
वाधूलमानिधिमहागुरुरेष आस्ते
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ १४ ॥

आचार्यपूरुषवरा ह्यभिरामवृद्धा
अर्हाभिपूज्यतर मङ्गलवस्तुहस्ताः।
त्वत्पादपङ्कजसिषेविषया प्रपन्नाः
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ १५ ॥

श्रीमन्नृसिंहगिरिशेखरसुप्रभातं
ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः।
तेभ्यः प्रसन्नवदनः कमलसहायः
सर्वाणि वाञ्छितफलानि ददाति कामम्॥ १६ ॥

॥ इति श्रीयोगलक्ष्मीनरसिंहसुप्रभातम् संपूर्णम् ॥